
संस्कृत-त्रैमासिक-पत्रिका,
वार्षिक रु-१५०

ISSN 2321-1342

# देवसायुज्यम्

वर्ष-०९, जनवरी-मार्च-२०१६

अङ्कः-६७




परोपकाराय फलन्ति वृक्षाः ।

सम्पादकः डॉ.प्रफुल्लः पुरोहितः

Scanned with CamScanner

# ।। श्रीमद्भगवद्गीतायाः समाजस्योपरि प्रभावः ।।



समाजं प्रभावीकर्तुं बहुनि सन्ति कारणानि । यथा चलचित्राणि, दूरदर्शनं, वर्तमानपत्राणि, राजकीयशाशकीयप्रवृत्तयः, यावन्ति शिक्षणकेन्द्राणि सन्ति तावन्ति सर्वाणि, पुस्तकानि च । एवं एषाऽऽवली इतोऽपि दीर्घा भवितुमर्हति । अत्र कस्य प्रभावः प्रबलः? इति चिन्तनस्य विषयो न अपि तु कस्य प्रभावः उत्तमः? इति चिन्तनस्य विषयोऽस्ति । भगवद्गीतायामपि उक्तमस्ति यत्

**अशोच्यानन्वशोचस्त्वं प्रज्ञाबादांश्च भाषसे ।**
**गतासूनगतासूश्च नानुशोचन्ति पण्डिताः ।।**

अर्जुनेन युद्धरङ्गे क्षत्रियोचितं युद्धं करणीयम् आसीत् । अधर्मपक्षधराणां नाशनं तदीयः धर्मः" आसीत् । तं स्वधर्मं विस्मृत्य सः खेदं कर्तुम् आरब्धवान् । तेन चिन्तनीयम् आसीत् - पुरतः विद्यमानानां दुष्टत्वं , येन तस्य युद्धोत्साहः प्रबुद्धः अभविष्यत् । अतः भगवता श्रीकृष्णेन सः उक्तः - **अशोच्याम् अन्वशोचः त्वम् "** इति । तथैव अस्माकं निजजीवने एवमेव भवति । कस्मिन् विषये अस्माभिः चिन्तनीयम् यत् कस्य प्रभावः उत्तमः" ? तर्हि निशङ्कतया वक्तुं शक्यते उत्तमानां पुस्तकानां प्रभावः उत्तमः। फ्रान्सदेशे यदि रूसो, डिडेरो-इत्यादयः विचारकाः न अभिष्यन् तर्हि क्रान्तिः अपि न अभिष्यत् । एतत्दृष्टया यदि पश्यामः तर्हि भगवद्गीतायाः समाजस्योपरि उपकाररूपं कार्यं स्यात् । उत्तमानां विचाराणां समाजे प्रतिपादम्" इति । मानवजीवने उत्तमैः विचारैः परिवर्तनं शक्यम् । सहस्राधिकवर्षेभ्यः भगवद्गीतायाः प्रभावो मानवजीवने भवत्येव । देशकालाभ्याम् अबाधिताः गीताविचाराः शाश्वताः सन्तः समाजं प्रभावीकुर्वन्तः सन्ति । समाजे यत्र धर्मः तत्र उत्तमाः विचाराः इत्युक्ते गीताविचाराः। अतः एवं वक्तुं शक्यते यत् गीताविचारैः धर्मः, धर्मात् जयः। अतः एव गान्धीमहोदयेन उक्तम् -

" I find a solace in the Bhagavadgita, in the Upanishads, that I miss even in the sermon on the Mount. When disppointment stares me on the face. and all above I see not one ray of Light I go back to the Bhagvadgita."

Scanned with CamScanner

कुत्र भगवद्गीतायाः मानवसमाजे प्रभावः जातः?

- पाण्डुरङ्गशास्त्रिणा स्वाध्यायप्रवृत्तिद्वारा गीताविचारैः विविधैः प्रयोगैः च परिवर्तनं कृतमस्ति, एतत्तु सर्वदा सर्वैः सुविदितमेव।

- रामकृष्णमिशन-आर्यसमाज-ॐ शान्तादयः सम्प्रदायाः अपि गीताविचारान् स्वीकृत्य सत्प्रवृत्तयः कुर्वन्तः सन्ति।

- गीतायाः एकं एकं विचारबिन्दुं स्वीकृत्य बहुभिः संस्थाभिः नैकानां जनानां जीवनपरिवर्तनं कृतमस्ति। यथा योगः कर्मसु कौशलम्" इति विचारेण Art of Living" इति प्रवृत्तिः प्रचलिता वर्तते।

- भारते ये ये महापुरुषाः अभवन् तेषां पृष्ठे गीताविचाराः एव आसन् - यथा स्वामीविवेकानन्दः, महात्मा गान्धी, स्वामीदयानन्दसरस्वती, विनोबाजी, रविन्द्रनाथः इत्यादयः।

- यदा एकः सागरपुत्रः, भूमिपुत्रः (कृषकः), एकः सेवकः, एकः शिक्षकः, एकः हरिजनः च गीतायाः विचारान् स्वीकृत्य स्वजीवनं साधुवत् सरलतया जीवति तदा सिद्धयति यत् गीतायाः प्रभावः समाजे अस्त्येव। तस्यार्थः एवं न भवति गीतायां सत्यामपि किमर्थं भ्रष्टाचारः (उत्कोचः) भवति ? किमर्थं आतङ्कवादः? इति। तत्रापि उत्तरं वर्तते यत् **जानामि धर्मं न मे प्रवृत्तिः, जनान् अधर्मं न मे निवृत्तिः।"** इति न्यायः प्रवर्तते। अतः एव कर्णेनुक्तम् - **वक्तव्यं सुकरं कर्तव्यं दुष्करम्** " इति।

- यत्र गीताऽस्ति, गीताविचाराः सन्ति तत्र आध्यात्मिकी जीवनदृष्टिः।

  यत्र भौतिकजीवनमस्ति तत्र भोगवादः। पदार्थानाम् उपभोगाय टेकनोलोजी त्तपयोगः। तेनैव आयः, आयात् षड्रिपवः (मोहमायादिः), तैः च विभक्तः परिवारः।

  यत्र आध्यात्मिकजीवनमस्ति तत्र **तेन त्यक्तेन भुञ्जीथाः"** इति दृष्टया उपभोगः, विवेकपूर्वं टेकनोलोजी उपयोगः, तेनैव जीवनाय आयः, तैः सद्गुणानां आविर्भावः एवं च अविभक्तः परिवारः। अतः भारते यत्र अविभक्तः परिवारः तत्र गीताप्रभावः।

- समाजे यत्र प्रामाणिकता, दया, क्षमा, करुणा, प्रेम इत्यादिनि मूल्यानि निहितानि दृश्यन्ते तत्र गीताप्रभावः।

- यथा व्यजनानां कृते, दीपदण्डानां कृते, शीतकानां कृते वा यानि यानि विद्युत् उपकरणानि सन्ति, तेषां च सर्वेषां कृते विद्युतप्रवाहः आवश्यकः तथा मानवसमाजे समस्यासमाधानाय, उत्कृष्टजीवनाय, धर्मरक्षणाय, विचारसंवर्धनाय च गीताप्रवाहः आवश्यकः।

**डॉ.ललितः पटेलः**



Scanned with CamScanner